श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमदाग्नेयपुराणान्तर्गतम्

# ॥ श्री पापप्रणाशनस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पापप्रणाशनस्तोत्रम् ॥

पुष्कर उवाच

परदारपरद्रव्यजीवहिंसादिके यदा।
प्रवर्तते नृणां चित्तं प्रायश्चित्तं स्तुतिस्तदा ॥ 1 ॥

विष्णवे विष्णवे नित्यं विष्णवे विष्णवे नमः।
नमामि विष्णुं चित्तस्थमहङ्कारगतं हरिम् ॥ 2 ॥

चित्तस्थमीशमव्यक्तमनन्तमपराजितम्।
विष्णुमीड्यमशेषेण ह्यनादिनिधनं विभुम् ॥ 3 ॥

विष्णुश्चित्तगतो यन्मे विष्णुर्बुद्धिगतश्च यत्।
यच्चाहङ्कारगो विष्णुर्यद्विष्णुर्मयि संस्थितः ॥ 4 ॥

करोति कर्मभूतोऽसौ स्थावरस्य चरस्य च।
तत्पापं नाशमायातु तस्मिन्नेव हि चिन्तिते ॥ 5 ॥

ध्यातो हरति यत्पापं स्वप्ने दृष्टस्तु भावनात्।
तमुपेन्द्रमहं विष्णुं प्रणतार्तिहरं हरिम् ॥ 6 ॥

जगत्यस्मिन्निराधारे मज्जमाने तमस्यधः।
हस्तावलम्बनं विष्णुं प्रणमामि परात्परम् ॥ 7 ॥

सर्वेश्वरेश्वर विभो परमात्मन्नधोक्षज।
हृषीकेश हृषीकेश हृषीकेश नमोऽस्तु ते ॥ 8 ॥

नृसिंहानन्त गोविन्द भूतभावन केशव।
दुरुक्तं दुष्कृतं ध्यातं शमयाघं नमोऽस्तु ते॥ **9** ॥

यन्मया चिन्तितं दुष्टं स्वचित्तवशवर्त्तिना।
अकार्यं महदत्युग्रं तच्छमं नय केशव॥ **10** ॥

ब्रह्मण्यदेव गोविन्द परमार्थपरायण।
जगन्नाथ जगद्धातः पापं प्रशमयाच्युत॥ **11** ॥

यथाऽपराह्णे सायाह्ने मध्याह्ने च तथा निशि।
कायेन मनसा वाचा कृतं पापमजानता॥ **12** ॥

जानता च हृषीकेश पुण्डरीकाक्ष माधव।
नामत्रयोच्चारणतः पापं यातु मम क्षयम्॥ **13** ॥

शरीरं मे हृषीकेश पुण्डरीकाक्ष माधव।
पापं प्रशमयाद्य त्वं वाक्कृतं मम माधव॥ **14** ॥

यद् भुञ्जन् यत् स्वपंस्तिष्ठन् गच्छन् जाग्रद्यदा स्थितः।
कृतवान् पापमद्याहं कायेन मनसा गिरा॥ **15** ॥

यत् स्वल्पमपि यत् स्थूलं कुयोनिनरकावहम्।
तद् यातु प्रशमं सर्वं वासुदेवानुकीर्तनात्॥ **16** ॥

परं ब्रह्म परं धाम पवित्रं परमञ्च यत्।
तस्मिन् प्रकीर्तिते विष्णौ यत्पापं तत्प्रणश्यतु॥ **17** ॥

यत्प्राप्य न निवर्तन्ते गन्धस्पर्शादिवर्जितम्।
सूरयस्तत्पदं विष्णोस्तत्सर्वं शमयत्वघम्॥ **18** ॥

पापप्रणाशनं स्तोत्रं यः पठेच्छृणुयादपि।
शारीरैर्मानसैर्वाग्जैः कृतैः पापैः प्रमुच्यते॥ **19** ॥

सर्वपापग्रहादिभ्यो याति विष्णोः परं पदम्।
तस्मात्पापे कृते जप्यं स्तोत्रं सर्वाघमर्दनम्॥ **20** ॥

प्रायश्चित्तमघौघानां स्तोत्रं व्रतकृते वरम्।
प्रायश्चित्तैः स्तोत्रजपैर्व्रतैर्नश्यति पातकम्॥
ततः कार्याणि संसिद्ध्यै तानि वै भुक्तिमुक्तये॥ **21** ॥

॥ श्री पापप्रणाशनस्तोत्रं समाप्तम्॥